## कर्तृस्थे चाशरीरे कर्मणि । (३७/२७१०)

[1]नयतेः कर्ता देवदत्तादिर्लकारवाच्यः । [2]कर्तृस्थे कर्मण्यशरीरे सति नयतेरात्मनेपदं भवति । शरीरं [3]प्राणिकायः, तदेकदेशोऽपि शरीरम् । क्रोधं विनयते । मन्युं विनयते[4] । कर्तृस्थे इति किम्? देवदत्तो यज्ञदत्तस्य क्रोधं विनयति । अशरीरे इति किम्? [5]गडुं विनयति । [6]घाटां विनयति । कर्मणि इति किम्? बुद्ध्या विनयति । प्रज्ञया विनयति ॥

## वृत्तिसर्गतायनेषु क्रमः । (३८/२७११)

शेषात् कर्तरि परस्मैपदे (१.२.७८/२१५९) प्राप्ते वृत्त्यादिष्वर्थेषु क्रमेर्धातोरात्मनेपदं भवति । वृत्तिर-प्रतिबन्धः । सर्ग उत्साहः । तायनं स्फीतता । वृत्तौ तावत्--[7]ऋक्ष्वस्य क्रमते बुद्धिः । न प्रतिहन्यते इत्यर्थः । [8]यजुःष्वस्य क्रमते बुद्धिः । [9]सर्गे--[10]व्याकरणाध्ययनाय क्रमते । उत्सहते इत्यर्थः । तायने--अस्मिन् [11]शास्त्राणि क्रमन्ते । [12]स्फीतीभवन्ति इत्यर्थः । [13]एतेषु इति किम् ? अपक्रामति[14] ॥

## उपपराभ्याम् । (३९/२७१२)

वृत्तिसर्गतायनेषु इति वर्तते । [15]उपपरापूर्वात् क्रमतेर्वृत्त्यादिष्वर्थेषु वर्तमानादात्मनेपदं भवति । किमर्थं तर्हीदमुच्यते ? उपसर्गनियमार्थम् । सोपसर्गादुपपरापूर्वादेव, नान्यपूर्वात् इति । उपक्रमते । पराक्रमते । उपपराभ्याम् इति किम् ? सङ्क्रामति । वृत्त्यादिष्वित्येव । उपक्रामति । पराक्रामति[16] ॥

## आङ उद्गमने । (४०/२७१३)

आङ्पूर्वात् क्रमतेरुद्गमने वर्तमानादात्मनेपदं भवति । [17]आक्रमते आदित्यः । आक्रमते चन्द्रमाः । आक्रमन्ते ज्योतींषि । उद्गमने इति किम् ? आक्रामति माणवकः [18]कुतुपम् ।

[५०] ज्योतिरुद्गमने इति वक्तव्यम् । (म.भा. १.२८२)

इह मा भूत्, आक्रामति धूमो [19]हर्म्यतलात् (म.भा. १.२८२) ॥

## वेः पादविहरणे । (४१/२७१४)

विपूर्वात् क्रमतेः पादविहरणेऽ[20]र्थे वर्तमानादात्मनेपदं भवति । विहरणं विक्षेपः । [21]सुष्ठु विक्रमते । साधु विक्रमते । अश्वादीनां गतिविशेषो [22]विक्रमणमुच्यते । यद्यपि [23]क्रमिः पादविहरण[24] एव पठ्यते, [25]'क्रमु पादविक्षेपे' (धा.पा. ४७३) इति, तथाप्यनेकार्थत्वाद् धातूनामेवमुक्तम् । पादविहरणे इति किम् ? विक्रामत्य-जिनसन्धिः ॥

---

1. णीञ् इति वर्तते इत्यधिकम् फ. 2. तत्तस्थे फ. 3. प्राणि नास्ति क. 4. शमयति इत्यर्थः इत्यधिकम् ह. 5. गदं ब. 6. षण्ढं ब, कण्डूं क, नास्ति फ. 7. ऋचि अस्य ड. 8. उदाहरणमिदं नास्ति फ. 9. सर्गः क. 10. लोकायताध्ययनाय क. फ. ह. 11. शास्त्रसहस्राणि क. 12. स्फीतानि अ. ह. 13. एतेषु—अपक्रामति नास्ति फ. ह, एतेषु इत्यस्य स्थाने वृत्त्यादिषु प. मं. 14. 'क्रमः परस्मैपदेषु' (7.3.76/2322) इति दीर्घः इत्यधिकम् अ. 15. उपपरा इत्येवंपूर्वात् ड. 16. 'क्रमः परस्मैपदेषु' (7.3.76/2322) इति दीर्घः इत्यधिकम् अ. 17. उदाहरणमिदं नास्ति फ. 18. कुतपम् ब. फ. ई. ड. 19. हर्म्यतलम् अ. ब. ई, तलमिति फ. 20. अर्थे नास्ति क. 21. सुष्ठु नास्ति फ. 22. विहरणं फ. 23. च इत्यधिकम् क. 24. अर्थे इत्यधिकम् क, एव नास्ति फ. 25. क्रमु पादविक्षेपे इति नास्ति फ.